346sk17

१७

भ्वादिप्रकरणे - लट् लिट् एतयोः सूत्रशेषः

प्रस्तावना

एकैकस्य धातोः रूपाणां साधनाय यानि अनतिक्रान्तानि नूतनानि सूत्राणि आवश्यकानि तानि आनीय व्याख्याय च धातोः रूपाणि साध्यन्ते इति क्रमः वैयाकरणसिद्धान्तकौमुदी इत्यादिग्रन्थेषु पुरस्कृतः। तेन एकैकस्य धातोः रूपाणि ज्ञायन्ते परन्तु एकस्य लकारस्य सर्वाणि सूत्राणि विकीर्णानि भवन्ति। एवञ्च समग्रस्य समुदितः बोधः अत्यल्पानामेव भवति। अतः इतः परं परस्मैपदप्रकरणे लकारक्रमेण सूत्राणि उपस्थापयिष्यन्ते। अत्र कानिचन बहुत्र प्रयुक्तानि साधारणसूत्राणि दत्तानि सन्ति। कानिचन तिङन्तप्रकरणे अग्रे आवश्यकानि इति धिया दत्तानि सन्ति।

वैयाकरणसिद्धान्तकौमुदी इत्यादिप्रक्रियाग्रन्थेषु धातूनां कश्चित् क्रमः आदृतः। तथापि लघुसिद्धान्तकौमुद्याम् धातवः चिताः सन्ति। एवमेव अत्रापि प्रक्रियासौकर्याय चितानां धातूनां चितानि स्थलानि एव प्रदर्शितानि, न तस्य धातोः सर्वाणि रूपाणि। अन्यानि रूपाणि विद्यार्थिना स्वयं बोद्धव्यानि। एवञ्च यदि एकैकस्य धातोः सर्वाणि रूपाणि सदा दीयन्ते तर्हि ग्रन्थाकारगौरवम् भवति। अतः अनन्यगतिकतया पन्था अयमवलम्बितः।

उद्देश्यानि

इमम् पाठं पठित्वा भवान् -

- तिङन्तप्रकरणस्य मुख्यानि सूत्राणि बुध्यात्।
- विभिन्नानां धातूनां रूपाणि साधयितुं प्रभवेत्।
- विविधानि सूत्राणि व्याख्यातुम् समर्थो भवेत्।
- पूर्वपाठेषु कृतानां सार्वधातुकम् आर्धधातुकं संज्ञानां रूपेषु प्रभवं जानीयात्।
- भूधातुरूपाणि साधयित्वा अवशिष्टानि बहुषु लकारे एवञ्च विशिष्य लिटि प्रयुक्तानि सूत्राणि अत्र ज्ञास्यति।
- रहस्यमयम् इडागमप्रकरणम् अस्मिन् पाठे पठिष्यति।

लकारक्रमः - लिट्

[१७.१] अत आदेः॥ (७.४.७०)

सूत्रार्थः - अभ्यासस्यादेरतो दीर्घः स्यात्।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण दीर्घः विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। अतः (६/१), आदेः (६/१)। अत्र लोपोऽभ्यासस्य इति सूत्राद् अभ्यासस्य (६/१) पदमनुवर्तते। दीर्घ इणः किति इति सूत्रात् दीर्घः (१/१) पदमायाति। पदयोजना - अभ्यासस्य आदेः अतः दीर्घः। सूत्रार्थो भवति - अभ्यासस्य आदेः अतो दीर्घो भवति। अभ्यासस्य स्वाभाविकः अत् चेत् दीर्घो भवति। ह्रस्वः इति सूत्रेण ह्रस्वीकृतस्य अनेन दीर्घत्वं न क्रियते।

उदाहरणम् - आत।

सूत्रार्थसमन्वयः - अत सातत्यगमने इति धातोः परोक्षे लिट् इति सूत्रेण लिटि प्रथमपुरुषैकवचनविवक्षायां तिपि तस्य णलि अनुबन्धलोपे अत् अ इति स्थिते लिटि धातोरनभ्यासस्य इति सूत्रेण द्वित्वे अत् अत् अ इति जाते पूर्वोऽभ्यासः इति सूत्रेण पूर्वस्य अत् इत्यस्य अभ्याससंज्ञायां हलादिः शेषः इति आदेः हलः अभावे तकारः लुप्यते। तेन अ अत् अ इति जाते अतो गुणे इत्यनेन पररूपे प्राप्ते अत आदेः इति प्रकृतसूत्रेण अभ्यासस्य अतः दीर्घे आकारे आ अत् अ इति स्थितिर्जायते। तदा -

[१७.२] अत उपधायाः॥ (७.२.११६)

सूत्रार्थः - उपधाया अतो वृद्धिः स्याद् ञिति णिति च प्रत्यये परे।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण वृद्धिः विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। अतः उपधायाः इति सूत्रगतपदच्छेदः। अतः (६/१), उपधायाः (६/१)। मृजेर्वृद्धिः इति सूत्रात् वृद्धिः (१/१) पदमायाति। अचो ञ्णिति इति सूत्रात् ञ्णिति (७/१) पदमायाति। ञ् च ण् च ञ्णौ इति इतरेतरयोगद्वन्द्वसमासः। ञ्णौ इतौ यस्य स ञ्णित्, तस्मिन् ञ्णिति इति बहुव्रीहिसमासः। अङ्गस्य इत्यधिकारे पठितत्वात् प्रत्यये परे एव अङ्गसंज्ञायाः उपपन्नत्वात् प्रत्यये (७/१) इति पदम् आक्षिप्यते। पदयोजना - उपधायाः अतः वृद्धिः ञ्णिति प्रत्यये। सूत्रार्थो भवति - उपधा यः अत् तस्य वृद्धिः भवति ञिति णिति च प्रत्यये परे। अतः स्थाने स्थानेऽन्तरतमः इति परिभाषया स्थानत आन्तर्याद् आकारः वृद्धिः स्यात्।

उदाहरणम् - आत।

सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण आ अत् अ इति जाते णलः णित्त्वात् उपधायाः अतः वृद्धौ आ आत् अ इति स्थितिः जायते। तदा अकः सवर्णे दीर्घः इति सूत्रेण आकार-आकारयोः दीर्घैकादेशे **आत** इति रूपं सिध्यति।

[१७.३] द्विर्वचनेऽचि॥ (१.१.५९)

सूत्रार्थः - द्वित्वनिमित्तेऽचि अच आदेशो न द्वित्वे कर्तव्ये।

सूत्रव्याख्या - निषेधसूत्रमिदम्। अनेन सूत्रेण अचः आदेशः निषिध्यते। अस्मिन् सूत्रे द्वे पदे स्तः। द्विर्वचने अचि इति सूत्रगतपदच्छेदः। द्विर्वचने (७/१), अचि (७/१)। अचः परस्मिन् पूर्वविधौ इति सूत्रात् अचः (६/१) इति पदमनुवर्तते। स्थानिवदादेशोऽनल्विधौ इति सूत्रात् आदेशः (१/१) इति पदमायाति। पदान्तद्विर्वचन॰ इति सूत्रात् न इत्यव्ययमनुवर्तते। द्विः उच्यते अस्मिन् इति द्विर्वचनम्। अत्र द्विर्वचने इत्यस्य आवृत्तिः भवति। तेन द्विर्वचने द्विर्वचने इति लभ्यते। पदयोजना - द्विर्वचने अचि अचः आदेशः न द्विर्वचने। सूत्रार्थो भवति - द्वित्वे कर्तव्ये द्वित्वनिमित्ते अचि अचः स्थाने आदेशः न भवति।

अर्थात् द्वित्वविधायकसूत्रेण द्वित्वम् कर्तव्यम् अस्ति। परन्तु अन्येन केनचित् सूत्रेण तत्र अचः स्थाने आदेशः प्राप्तः अस्ति। एवञ्च स आदेशः द्वित्वस्य यन्निमित्तम् अर्थात् लिट् तस्य अचं निमित्तीकृत्य प्रवर्तते। अपि च द्वित्वविधायकसूत्राद् अचः आदेशविधायकं सूत्रं बलवद् अस्ति तदा द्विर्वचनेऽचि इति सूत्रेण स आदेशः द्वित्वार्थं निषिध्यते। कृते च द्वित्वे यथासूत्रम् अचः आदेशादिकं पुनः प्रसज्यते। अर्थात् अचः आदेशात् पूर्वं द्वित्वं कर्तव्यम्। ततः परम् अचः आदेशादिकं कर्तव्यम्।

उदाहरणे सूत्रार्थसमन्वयः - क्षयार्थकात् क्षिधातोः परोक्षे लिट् इति सूत्रेण लिटि लस्य स्थाने प्रथमपुरुषैकवचनविवक्षायां तिपि क्षि ति इति स्थिते परस्मैपदानां णलतुसुस्-थलथुस-णल्वमाः इति सूत्रेण तिपः सर्वादेशे णलि अनुबन्धलोपे क्षि अ इति स्थितिर्जायते।

अत्राधुना लिटि धातोरनभ्यासस्य (६.१.८) इति सूत्रेण धातोः द्वित्वम् प्राप्तम्। परन्तु इको यणचि (६.१.७७) इति सूत्रेण इकः यणादेशः प्राप्तः। तत्रापि णलः णित्त्वात् अचो ञ्णिति (७.१.९१) इति सूत्रेण अजन्ताङ्गस्य वृद्धिः प्राप्ता। तत्रापि पुनः सार्वधातुकार्धधातुकयोः (७.३.८४) इति सूत्रेण इगन्ताङ्गस्य गुणः प्राप्तः। किञ्च विप्रतिषेधे परं कार्यम् इति परिभाषया द्वित्वाद् यणादेशः बलीयान्। यणादेशाद् वृद्धिः बलीयसी। वृद्धेरपि गुणो बलीयान्। अतः द्वित्वात् पूर्वं गुणः प्राप्तः। तत्र णलं निमित्तीकृत्य द्वित्वं प्राप्तम्। तस्य अकारः द्वित्वनिमित्तकः अच् अस्ति। द्विर्वचनेऽचि इति सूत्रेण अस्मिन् अचि परतः अचः आदेशः न स्यात् द्वित्वे कर्तव्ये। अर्थात् प्रथमं द्वित्वं भवति। ततः परम् अचः आदेशादिकं भवति। एवम् लिटि धातोरनभ्यासस्य इति सूत्रेण अनभ्यासधात्ववयवस्य एकाचः क्षि इत्यस्य द्वित्वे क्षि क्षि अ इति जाते द्विरुक्तस्य पूर्वभागस्य क्षि इत्यस्य पूर्वोऽभ्यासः इति सूत्रेण अभ्याससंज्ञायां हलादिः शेषः इति सूत्रेण अभ्यासस्य आदेः हलः शेषे कि क्षि अ इति जायते। तदा -

[१७.४] कुहोश्चुः॥ (७.४.६२)

सूत्रार्थः - अभ्यासकवर्गहकारयोः चवर्गादेशः स्यात्।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण चवर्गः विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। कुहोः चुः इति सूत्रगतपदच्छेदः। कुहोः (६/२), चुः (१/१)। अत्र लोपोऽभ्यासस्य इति सूत्रात् अभ्यासस्य (६/१) इति षष्ठ्यन्तपदमनुवर्तते। कुः च ह् च कुहौ, तयोः इति इतरेतरयोगद्वन्द्वसमासः। सूत्रार्थो भवति - अभ्यासस्य कवर्गस्य हकारस्य च स्थाने चवर्गः आदेशः भवति। कुहोः इति स्थानिनः षट्। चुः इति आदेशाः पञ्च। अतः स्थान्यादेशयोः संख्यावैषम्यात् स्थानेऽन्तरतमः इति सूत्रेण गुणकृदान्तर्येण निर्वाहः भवति।

[आन्तरतम्यपरीक्षा - (परीक्षायाः कृते नास्ति)

स्थानेऽन्तरतमः इति परिभाषा यत्र प्रवर्तते तत्र स्थानिना सदृशतमः आदेशः कर्तव्यः। सादृश्यम् स्थानार्थगुणप्रमाणतः चतुर्विधम् अस्ति। सदृशतमस्य आदेशस्य अन्वेषणाय आन्तरतम्यपरीक्षा क्रियते एव। सा च परीक्षा अत्र किञ्चित् प्रदर्श्यते।

स्थानकृद् आन्तर्यमस्ति न वा - स्थानिनः कवर्गस्य हकारस्य उच्चारणस्थानम् अकुहविसर्जनीयानां कण्ठाः इति वचनात् कण्ठः। आदेशेषु चवर्गस्य समेषां उच्चारणस्थानं तालु। अतः स्थानिभिः सदृशतमः तेषु विधीयमानेषु आदेशेषु कोऽपि न लभ्यते।

प्रमाणकृद् आन्तर्यमस्ति न वा - प्रमाणमत्र उच्चारणकालः। स्थानी कवर्गः हकारश्च अर्धमात्रिकाः, आदेशाः चुः च छ ज झ ञ एते पञ्च समेऽपि अर्धमात्रिकाः। अतः तेषु कश्चिदेकः प्रमाणतः अन्तरतमः नास्ति।

अर्थकृद् आन्तर्यमस्ति न वा - वर्णानां न कोऽपि अर्थः अत्र गृह्यते। समुदायो ह्यर्थवान् तस्यैकदेशोऽनर्थकः इति न्यायः। अतः अर्थतः आन्तर्यं न विचार्यते।

गुणकृदान्तर्यमस्ति न वा - गुणशब्दस्यार्थः अत्र बाह्ययत्नः। स्थानिना कवर्गेण हकारेण आदेशेषु यस्य बाह्ययत्नाः समानाः सन्ति स आदेशः चवर्गः सदृशतमः। बाह्ययत्नाः सविस्तरम् अधः प्रदर्श्यन्ते।

	वर्णः	**बाह्ययत्नाः**			
स्थानी	क	विवारः	श्वासः	अघोषः	अल्पप्राणः
	ख	विवारः	श्वासः	अघोषः	महाप्राणः
	ग	संवारः	नादः	घोषः	अल्पप्राणः
	घ	संवारः	नादः	घोषः	महाप्राणः

	ङ	संवारः	नादः	घोषः	अल्पप्राणः
	ह	संवारः	नादः	घोषः	महाप्राणः
आदेशाः	च	विवारः	श्वासः	अघोषः	अल्पप्राणः
	छ	विवारः	श्वासः	अघोषः	महाप्राणः
	ज	संवारः	नादः	घोषः	अल्पप्राणः
	झ	संवारः	नादः	घोषः	महाप्राणः
	ञ	संवारः	नादः	घोषः	अल्पप्राणः

प्रकरणे साक्षात् स्थानी कः अस्ति इति दृष्ट्वा आदेशेषु यस्य बाह्यप्रयत्नः स्थानिना सदृशतमः स्यात् स आदेशः भवति।

यथा - स्थानी ककारः चेत् आदेशेषु चकारस्य एव बाह्यप्रयत्नाः ककारतुल्याः सन्ति।

स्थानी खकारः चेत् आदेशेषु छकारस्य एव बाह्यप्रयत्नाः खकारतुल्याः सन्ति।

स्थानी गकारः चेत् आदेशेषु जकारस्य एव बाह्यप्रयत्नाः गकारतुल्याः सन्ति।

स्थानी घकारः चेत् आदेशेषु झकारस्य एव बाह्यप्रयत्नाः घकारतुल्याः सन्ति।

स्थानी ङकारः चेत् आदेशेषु ञकारस्य एव बाह्यप्रयत्नाः ङकारतुल्याः सन्ति। यद्यपि ङकारेण तुल्याः जकारस्यापि सन्ति। तथापि ङकारञकारयोः अनुनासिकत्वमस्ति इति हेतोः ङकारस्य स्थाने ञकार एव भवति।

स्थानी हकारः चेत् आदेशेषु झकारस्य एव बाह्यप्रयत्नाः हकारतुल्याः सन्ति।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण कि क्षि अ इति स्थितिः जाता। अत्राधुना कुहोश्चुः इति प्रकृतसूत्रेण अभ्यासस्य कवर्गस्य ककारस्य स्थाने चवर्गः कर्तव्यः अस्ति। ककारस्य स्थाने आदेशेषु चवर्गीयेषु कतमः स्यात् इति आन्तरतम्यपरीक्षा उपरि सूत्रव्याख्यायाम् प्रदर्शिता। तत्राधुना स्थानी ककारः। तस्य बाह्यप्रयत्नाः विवारः श्वासः अघोषः अल्पप्राणः चेति। आदेशेषु चकारस्य एव बाह्यप्रयत्नाः विवारः श्वासः अघोषः अल्पप्राणः इति ककारतुल्याः सन्ति। अतः चकार एव आदेशो भवति। तेन चि क्षि अ इति स्थितिः जायते।

[१७.५] अचो ञ्णिति॥ (७.१.९१)

सूत्रार्थः - अजन्ताङ्गस्य वृद्धिः ञिति णिति च प्रत्यये परे।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण वृद्धिः विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। अचः ञ्णिति इति सूत्रगतपदच्छेदः। अचः (६/१) ञ्णिति (७/१)। अङ्गस्य (६/१) इति अधिकृतम्। मृजेर्वृद्धिः इति सूत्रात् वृद्धिः (१/१) पदमनुवर्तते। ञ् च ण् च ञ्णौ इति इतरेतरयोगद्वन्द्वसमासः। ञ्णौ इतौ यस्य स

ञ्णित्, तस्मिन् ञ्णिति इति बहुव्रीहिसमासः। प्रत्यये परे एव अङ्गसंज्ञा उपपन्ना। अतः प्रत्यये इति सप्तम्यन्तम् पदम् आक्षिप्यते। इदम् अङ्गाक्षिप्तम् इति कथ्यते। पदयोजना - अचः अङ्गस्य ञ्णिति प्रत्यये वृद्धिः। अचः अङ्गस्य इति समानविभक्तिकत्वात् अचः इत्यस्य विशेषणत्वाच्च तदन्तविधिः भवति। तदन्तविधिना अजन्तस्य अङ्गस्य इति लभ्यते। अजन्ताङ्गस्य इत्यत्रापि अलोऽन्तस्य इति परिभाषया अन्त्यस्य एव अलः वृद्धिः भवति। अत्र अन्त्यः अल् अच् एव। अतः सूत्रार्थो भवति - अजन्ताङ्गस्य अन्त्यस्य अचः वृद्धिः भवति ञिति णिति च प्रत्यये परे।

उदाहरणम् - चिक्षाय।

सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण चि क्षि अ इति स्थितिः अस्ति। अत्राधुना णलि प्रत्यये परतः चिक्षि इति समुदायस्य अङ्गसंज्ञा भवति। तच्च अङ्गम् अजन्तम् अस्ति। एवञ्च णल् णित् प्रत्ययः अस्ति। अतः अलोऽन्त्यस्य इति परिभाषया अचो ञ्णिति इति सूत्रेण अजन्ताङ्गस्य अन्त्यस्य अलः इकारस्य स्थाने वृद्धौ स्थानत आन्तर्याद् ऐकारे चिक्षै अ इति स्थितिः भवति। ततश्च एचोऽयवायावः इति सूत्रेण आयादेशे **चिक्षाय** इति रूपं सिध्यति।

--

चिक्षियतुः - क्षयार्थकात् क्षिधातोः परोक्षे लिट् इति सूत्रेण लिटि लस्य स्थाने प्रथमपुरुषद्विवचनविवक्षायां तसि क्षि तस् इति स्थिते तसः सर्वादेशे अतुसि क्षि अतुस् इति स्थितिर्जायते। ततश्च सार्वधातुकार्धधातुकयोः इति सूत्रेण इगन्ताङ्गस्य इकारस्य गुणः प्राप्तः। तदा -

[१७.६] असंयोगाल्लिट् कित्॥ (१.२.५)

सूत्रार्थः - असंयोगात् परोऽपिल्लिट् कित् स्यात्।

सूत्रव्याख्या - अतिदेशसूत्रमिदम्। अनेन सूत्रेण कित्त्वम् अतिदिश्यते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। असंयोगात् लिट् कित् इति सूत्रगतपदच्छेदः। असंयोगात् (५/१), लिट् (१/१), कित् (१/१)। सार्वधातुकमपित् इति सूत्रात् अपित् (१/१) इति पदमायाति। न संयोगः असंयोगः, तस्मात् असंयोगात् इति नञ्-तत्पुरुषः समासः। प् इत् यस्य स पित् इतिबहुव्रीहिः समासः। न पित् अपित् इति नञ्तत्पुरुषसमासः। पदयोजना - असंयोगात् अपित् लिट् कित्। सूत्रार्थो भवति - असंयोगात् परः अपित् लिट् कित् भवति। अष्टादशसु तिङ्-प्रत्ययेषु तिप् सिप् मिप् त्रय एव पितः सन्ति। अन्ये १५ प्रत्ययाः अपितः एव सन्ति। एवञ्च तिबादीनां स्थाने विहिताः णलादयोऽपि स्वयम् अपितः एव सन्ति। तत्र तिप् सिप् मिप् एषाम् स्थाने विहिताः णल् थल् अ इति एते त्रयः पितः। अतः तद्भिन्नानाम् अपिताम् कित्त्वं भवति।

उदाहरणम् - चिक्षियतुः।

सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण क्षि अतुस् इति स्थितौ सार्वधातुकार्धधातुकयोः इति सूत्रेण इगन्ताङ्गस्य इकः इकारस्य गुणः प्राप्तः। स च इग्लक्षणः गुणः। अत्र लिटः स्थाने विहितो यः तस्-प्रत्ययः, तस्य स्थाने विहितः अतुस् न स्थानिवद्भावाद् नापि स्वतः पित् अस्ति। अतः अपित् अस्ति

लिट् च अस्ति। एवञ्च क्षि इत्यस्य अन्ते इकारः अस्ति, न तु संयोगः। अतः असंयोगात् परः अपित् लिट् अतुस् अस्ति। अतः प्रकृतसूत्रेण अतुसः कित्त्वम् अतिदिश्यते। तेन क्क्ङिति च इति सूत्रेण इग्लक्षणः गुणः निषिध्यते।

ततश्च लिटि धातोरनभ्यासस्य इति सूत्रेण अनभ्यासधात्ववयवस्य एकाचः क्षि इत्यस्य द्वित्वे क्षि क्षि अतुस् इति जाते द्विरुक्तस्य पूर्वभागस्य क्षि इत्यस्य पूर्वोऽभ्यासः इति सूत्रेण अभ्याससंज्ञायां हलादिः शेषः इति सूत्रेण अभ्यासस्य आदेः हलः शेषे कि क्षि अतुस् इति जायते। एवञ्च कुहोश्चुः इति सूत्रेण अभ्यासककारस्य स्थाने चकारे कृते चि क्षि अतुस् इति स्थितिः जाता। ततश्च अचि श्नुधातुभ्रुवां य्वोरियङुवङौ इति सूत्रेण षकारोत्तरस्य इकारस्य स्थाने इयङ् इत्यादेशे अनुबन्धलोपे चि क्षिय् अतुस् इति जाते समुदायस्य तिङन्तत्वेन पदत्वात् सस्य रुत्वे विसर्गे च कृते वर्णमेलने **चिक्षियतुः** इति रूपं सिध्यति।

चिक्षियुः - क्षिधातोः लिटि प्रथमपुरुषबहुवचनविक्षायां झिप्रत्यये तस्य स्थाने उस्-प्रत्यये क्षि उस् इति स्थिते सार्वधातुकार्धधातुकयोः इत्यनेन गुणे प्राप्ते उसः असंयोगाल्लिट् कित् इत्यनेन कित्त्वात् क्क्ङिति च इति सूत्रेण गुणनिषेधे द्वित्वे अभ्यासकार्ये च चि क्षि उस् इति स्थिते अचि श्नुधातुभ्रुवां य्वोरियङुवङौ इति सूत्रेण इकारस्य स्थाने इयङ् इत्यादेशे चि क्षिय् उस् इति जाते समुदायस्य तिङन्तत्वेन पदत्वात् सस्य रुत्वे विसर्गे च कृते वर्णमेलने **चिक्षियुः** इति रूपं सिध्यति।

चिक्षयिथ, चिक्षेथ - क्षिधातोः लिटि सिपि परस्मैपदानां णलतुसुस्-थलथुस-णल्वमाः इति सूत्रेण सिपः सर्वादेशे थलि अनुबन्धलोपे क्षि थ इति स्थितिर्जायते। लिट् च इति सूत्रेण लिडादेशस्य सिपः आर्धधातुकत्वात्, तदादेशः थल् अपि आर्धधातुकसंज्ञकः, स्वं वलादिश्च। अतः आर्धधातुकस्येड् वलादेः इति सूत्रेण थलः इडागमः प्राप्तः। तदा -

पाठगतप्रश्नाः-१

उपरितनपाठम् अवलम्ब्य अत्र केचित् लघूत्तरीयाः प्रश्नाः दीयन्ते। एतेषाम् उत्तराणि लिखित्वा अन्ते दत्तैः उत्तरैः मेलयत।

१. अभ्यासस्यादेरतो दीर्घः केन सूत्रेण।
२. अतति इत्यत्रत्यस्य अत्-धातोरर्थः कः।
३. उपधाया अतो वृद्धिः ञिति णिति च प्रत्यये परे केन सूत्रेण भवति।
४. द्विर्वचनेऽचि इति सूत्रस्यार्थं लिखत।
५. क्षिधातोः लिटि चिक्षाय इति रूपे ककारस्य चकारः केन सूत्रेण।
६. क्षिधातोः लिटि चिक्षाय इति रूपे इकारस्य वृद्धिः केन सूत्रेण।
७. चिक्षियतुः इति रूपे आर्धधातुकनिबन्धनगुणस्य अभावः कुतः।

८. चिक्षियतुः इति रूपे यकारः कुतः आगतः।

९. क्षिधातोः लिटि चिक्षाय इति रूपे ककारस्य चकारकरणे कीदृशमान्तर्यम्।

१) स्थानकृद् २) गुणकृद् ३) अर्थकृद् ४) प्रमाणकृद्

[१७.७] एकाच उपदेशेऽनुदात्तात्॥ (७.२.१०)

सूत्रार्थः - उपदेशे यो धातुः एकाच् अनुदात्तश्च तत आर्धधातुकस्य इट् न भवति।

सूत्रव्याख्या - निषेधसूत्रमिदम्। अनेन सूत्रेण इड् निषिध्यते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। एकाचः (५/१), उपदेशे (७/१), अनुदात्तात् (५/१)। ऋत इद्धातोः इति सूत्रात् धातोः (५/१) पदमनुवर्तते। नेड् वशि कृति इति सूत्रात् न इत्यव्ययमनुवर्तते, इट् (१/१) इति पदमनुवर्तते। एकः अच् यस्य यस्मिन् वा असौ एकाच्, तस्माद् एकाचः इति बहुव्रीहिसमासः। अनुदात्तः अस्ति अस्य इति अनुदात्तः धातुः (अर्शआदिभ्योऽच् इति अजन्तम् पदम्)। सूत्रार्थो भवति - उपदेशे यो धातुः एकाच् अनुदात्तः च तस्मात् परस्य आर्धधातुकस्य इट् न भवति। यो धातुः उपदेशावस्थायाम् एकाच् अपि अस्ति, अनुदात्तश्चापि अस्ति तस्मात् परस्य आर्धधातुकस्य इड् निषिध्यते इति विशिष्य अवधेयम्। यदि उपदेशे धातुः एकाच् अस्ति परन्तु अनुदात्तः नास्ति तर्हि निषेधः न प्रवर्तते। यदि धातुः उपदेशे अनुदात्तः अस्ति परन्तु एकाच् नास्ति तर्हि निषेधः न भवति। यस्मात् धातोः परस्य आर्धधातुकस्य इडागमः भवति स धातुः सेट् कथ्यते। यस्मात् धातोः परस्य आर्धधातुकस्य इडागमः विकल्पेन भवति स धातुः वेट् कथ्यते। यस्मात् धातोः परस्य आर्धधातुकस्य इडागमः न भवति स धातुः अनिट् कथ्यते। एवम् सेट् वेट् अनिट् इति धातुः त्रेधा इडागमवशात्।

आर्धधातुकस्येड्वलादेः इति सूत्रेण इडागमो विधीयते। तस्य अनेन सूत्रेण निषेधः क्रियते। अतः सूत्रार्थे उक्तं यद् आर्धधातुकस्य इट् न भवतीति।

उपदेशे धातुषु बहुत्र अधिकस्वरः योज्यते, तस्य उपदेशेऽजनुनासिक इत् इति सूत्रेण इत्संज्ञा च भवति। यस्य धातोः अनुदात्तः स्वरः इत्-संज्ञां लभते स धातुः अनुदात्तेत् कथ्यते। यस्य धातोः स्वकीयः स्वरः, यस्य इत्थम् इत्संज्ञा न भवति स धातुः अनुदात्तः कथ्यते। इत्थम् अनुदात्तः अनुदात्तेत् इति पदयोः अर्थे भेदः अस्ति।

पाणिनीयधातुपाठे पाणिनिना धातुस्वराः निर्दिष्टाः सन्ति। तत्र दर्शनेन तज्ज्ञानं भवितुमर्हति। तत्र परिशीलनेन केचित् धातवः निर्देष्टुं शक्यन्ते। अतः कः धातुः अनुदात्तः कश्च न अनुदात्तः इति ज्ञानाय व्यवसिताः धातवः सन्ति। ते अत्र दीयन्ते।

यस्य धातोः एकः अच् भवति स धातुः अजन्तः हलन्तः चेति भेदेन द्विविधो भवति।

तत्रेयम् अजन्तधातुविषयिणी कारिका - (एतत्कारिकास्था अनुदात्ताः न)

ऊदृदन्तैर्यौतिरुक्ष्णुशीङ्स्नुनुक्षुश्विडीङ्श्रिभिः।

वृङ्वृञ्भ्यां च विनैकाचोऽजन्तेषु निहताः स्मृताः॥

अत्र कारिकायाम् अविद्यमानः, अनुल्लिखितः एकाच् अजन्तः च धातुः अनुदात्तः भवति। कारिकायाम् उल्लिखिताः - ऊदन्तः ॠदन्तः (दीर्घः ॠ), यु रु क्ष्णु शीङ् स्नु क्षु श्वि डीङ् श्रि वृङ् वञ् इति एते। एतान् विहाय अन्यः एकाच् अजन्तः च धातुः अनुदात्तः भवति।

हलन्ताः १०३ धातवः- (अत्रत्याः १०३ अनुदात्ताः)

कान्तेषु शक्लेकः। चान्तेषु पच् मुच् रिच् वच् विच् सिचः षट्। **छान्तेषु** प्रच्छ्येकः।

जान्तेषु त्यज् निजिर् भज् भञ्ज् भुज् भ्रस्ज् मस्ज् यज् युज् रुज् रञ्ज् विजिर् स्वञ्ज् सञ्ज् सृजः पञ्चदश॥

दान्तेषु अद् क्षुद् खिद् छिद् तुद् नुद् पद्य भिद् विद्य विनद् विन्द् शद् सद् स्विद्य स्कन्द् हदः षोडश।

धान्तेषु क्रुध् क्षुध् बुध्य बन्ध् युध् रुध् राध् व्यध् साध् शुध् सिध्या एकादश।

नान्तेषु मन्यहनी द्वौ।

पान्तेषु आप् छुप् क्षिप् तप् तिप् तृप्य दृप्य लिप् लुप् वप् शप् स्वप् सृपस्त्रयोदश।

भान्तेषु यभ् रभ् लभस्त्रयः। **मान्तेषु** गम् नम् यम् रमश्चत्वारः।

शान्तेषु क्रुश् दंश् दिश् दृश् मृश् रिश् रुश् लिश् विश् स्पृशो दश।

षान्तेषु कृष् त्विष् तुष् द्विष् दुष् पुष्य पिष् विष् शिष् शुष् श्लिष्या एकादश॥

सान्तेषु घस्-वसती द्वौ। **हान्तेषु** दह् दिह् दुह् नह् मिह् रुह् लिह् वहः अष्टौ।

अनुदात्ता हलन्तेषु धातवस्त्र्यधिकं शतम्। १०३ धातवः अनुदात्ताः।

एते एव हलन्ताः अनुदात्ताः धातवः अकारादिक्रमेण अधः चतुरश्रे प्रदत्ताः सन्ति --

क्र.	धातुः	--	क्र.	धातुः	--	क्र.	धातुः	--	क्र.	धातुः	--	क्र.	धातुः
१	अद्		२२	दह्		४३	भिद्		६१	रिश्		८५	शप्
२	आप्		२३	दिश्		४४	भुज्		६२	रुज्		८६	शिष्
३	कृष्		२४	दिह्		४५	भ्रस्ज्		६३	रुध्		८७	शुध्
४	क्रुध्		२५	दुष्		४६	मन्य		६४	रुश्		८८	शुष्
५	क्रुश्		२६	दुह्		४७	मस्ज्		६५	रुह्		८९	श्लिष्य
६	क्षिप्		२७	दृप्य		४८	मिह्		६६	लभ्		९०	सञ्ज्
७	क्षुद्		२८	दृश्		४९	मुच्		६७	लिप्		९१	सद्

क्र.	धातुः	--	क्र.	धातुः	--	क्र.	धातुः	--	क्र.	धातुः	--	क्र.	धातुः
८	क्षुध्		२९	द्विष्		५०	मृश्		६८	लिश्		९२	साध्
९	खिद्		३०	नम्		५१	यज्		६९	लिह्		९३	सिच्
१०	गम्		३१	नह्		५२	यभ्		७०	लुप्		९४	सिध्य
११	घस्		३२	निजिर्		५३	यम्		७१	वच्		९५	सृज्
१२	छिद्		३३	नुद्		५४	युज्		७२	वप्		९६	सृप्
१३	छुप्		३४	पच्		५५	युध्		७३	वस्		९७	स्कन्द्
१४	तप्		३५	पद्य		५६	रञ्ज्		७४	वह्		९८	स्पृश्
१५	तिप्		३६	पिष्		५७	रभ्		७५	विच्		९९	स्वञ्ज्
१६	तुद्		३७	पुष्य		५८	रम्		७६	विजिर्		१००	स्वप्
१७	तुष्		३८	प्रच्छि		५९	राध्		७७	विद्य		१०१	स्विद्य
१८	तृप्		३९	बन्ध्		६०	रिच्		८१	विष्		१०२	हद्
१९	त्यज्		४०	बुध्य		७८	विनद्		८२	व्यध्		१०३	हन्
२०	त्विष्		४१	भज्		७९	विन्द्		८३	शकॢ			
२१	दश्		४२	भञ्ज्		८०	विश्		८४	शद्			

हलन्तेषु केषाञ्चिद् धातूनां विषये ईषत् विवरणम् अत्र चतुरश्रे दीयते।

अनुक्र.	धातुः - अर्थः	गणः, पदम्
१	शकॢँ शक्तौ	स्वादि, प.प.
२	पच् डुपचँष् पाके	भ्वादि, उ.प.
३	मुच् मुचॢँ मोक्षणे	तुदा, उ.प.
४	रिच् रिचिर् विरेचने, रिचिर् वियोजनसम्पर्चनयोः	रुधा, उ.प. चुरा, उ.प.
५	वच् वच परिभाषणे , ब्रुवो वचिः इति वच् अपि	अदा, प.प.
६	विच् विचिर् पृथग्भावे	रुधा, उ.प.
७	सिच् षिचँ क्षरणे	तुदा. उ.प.

अनुक्र.	धातुः - अर्थः	गणः, पदम्
८	प्रच्छ ज्ञीप्सायाम्	तुदा, प.प.
९	त्यज हानौ	भ्वा, प.प.
१०	निजिर् णिजिर् शौचपोषणयोः	जुहो., उ.प.
११	भजँ सेवायाम्	भ्वा, उ.प.
१२	भञ्ज् भञ्जोँ आमर्दने	रुधा, प.प.
१३	भुज् भुज पालनाभ्यवहारयोः , भुजोँ कौटिल्ये	रुधा, प.प तुदा, प.प.
१४	भ्रस्जँ पाके	तुदा, प.प.
१५	मस्ज् टुमस्जोँ शुद्धौ	तुदा, प.प.
१६	यजँ देवपूजासङ्गतिकरणदानेषु	भ्वा, उ.प.
१७	युज् युजिर् योगे , युजँ समाधौ , युज संयमने	रुधा, उ.प. दिवा, आ.प. चुरा, उ.प.
१८	रुज् रुजोँ भङ्गे	तुदा, प.प.
१९	रञ्जँ रागे	भ्वा, दिवा, उ.प.
२०	विजिर् पृथग्भावे	जुहो, उ.प.
२१	स्वञ्ज् ष्वञ्जँ परिष्वङ्गे	भ्वा, आ.प.
२२	सञ्ज् षञ्ज सङ्गे	भ्वा, प.प.
२३	सृज विसर्गे	दिवा, आ.प.। तुदा, प.प.
२४	अद भक्षणे	अदा, प.प.
२५	क्षुद् क्षुदिर् सम्पेषणे	रुधा, उ.प.
२६	खिद् खिदँ दैन्ये , खिद परिघाते	दिवा, रुधा, आ.प. तुदा, प.प.
२७	छिद् छिदिर् द्वैधीकरणे	रुधा, उ.प.
२८	तुदँ व्यथने	तुदा, उ.प.

अनुक्र.	धातुः - अर्थः	गणः, पदम्
२९	नुद णुद प्रेरणे	तुदा, उ.प.
३०	पद्य पदँ गतौ	दिवा, आ.प.
३१	भिद् भिदिर् विदारणे	रुधा, उ.प.
३२	विद्य – विद् - विदँ सत्तायाम्	दिवा, आ.प.
३३	विनद् - विद् विदँ विचारणे	रुधा, आ.प.
३४	विन्द् - विद् विदॢँ लाभे	तुदा, उ.प.
३५	शद् शदॢँ शातने	भ्वा, तुदा, प.प.
३६	सद् षदॢँ विशरणगत्यवसादनेषु	भ्वा, तुदा, प.प.
३७	स्विद्य स्विद् ञिष्विदाँ गात्रप्रक्षरणे	दिवा, प.प.
३८	स्कन्द् स्कन्दिर् गतिशोषणयोः	भ्वा, प.प.
३९	हदँ पुरीषोत्सर्गे	भ्वा, आ.प.
४०	क्रुध क्रोधे	दिवा, प.प.
४१	क्षुध बुभुक्षायाम्	दिवा, प.प.
४२	बुध्य बुध् बुधँ अवगमने	दिवा, आ.प.
४३	बन्ध बन्धने	क्र्यादि, प.प.
४४	युधँ सम्प्रहारे	दिवा, आ.प.
४५	रुध् रुधिँर् आवरणे, अनु+रुधँ कामे	रुधा, आ.प. दिवा, आ.प.
४६	राध् राध संसिद्धौ राध वृद्धौ	स्वा, प.प. दिवा, प.प.
४७	व्यध ताडने	दिवा, प.प.
४८	शुध शौचे	दिवा, प.प.
४९	साध संसिद्धौ	स्वा, प.प.
५०	सिध्य सिध् षिधुँ संराद्धौ	दिवा, प.प.
५१	मन्य – मन् मनँ ज्ञाने	दिवा, आ.प.

अनुक्र.	धातुः - अर्थः	गणः, पदम्
५२	हन हिंसागत्योः	अदा, प.प.
५३	आप् आपॢ व्याप्तौ आपॢ लम्भने	स्वा, प.प. चुरा, उ.प.
५४	क्षिप प्रेरणे	दिवा, प.प.। तुदा, उ.प.
५५	छुप स्पर्शे	तुदा, प.प.
५६	तप् - तप सन्तापे , तपँ ऐश्वर्ये , तप दाहे	भ्वा, प.प. दिवा, आ.प. चुरा, उ.प.
५७	तिप् तिपॄँ क्षरणे	भ्वादि, प.प.
५८	तृप्य तृप् तृप प्रीणने	दिवा, प.प.
५९	दृप्य दृप् दृप हर्षमोहनयोः	दिवा, प.प.
६०	लिपँ उपदेहे	तुदा, उ.प.
६१	लुप् - लुपॢँ छेदने	तुदा, उ.प.
६२	वप् डुवपँ बीजसन्ताने	भ्वादि, उ.प.
६३	शप् शपँ आक्रोशे	भ्वादि, दिवा, उ.प.
६४	स्वप् ञिष्वप् शये	अदा, प.प.
६५	सृप् सृपॢँ गतौ	भ्वादि, प.प.
६६	यभ मैथुने	भ्वादि, प.प.
६७	रभँ राभस्ये	भ्वादि, आ.प.
६८	लभ् डुलभँष् प्राप्तौ	भ्वादि, आ.प.
६९	गम गमॢँ गतौ	भ्वादि, प.प.
७०	नम् णम प्रह्वत्वे शब्दे च	भ्वादि, प.प.
७१	यम् यमुँ उपरमे	भ्वादि, प.प.
७२	रम् रमुँ क्रीडायाम्	भ्वादि, आ.प.
७३	क्रुश आह्वाने रोदने च	भ्वादि, प.प.

अनुक्र.	धातुः - अर्थः	गणः, पदम्
७४	दंश दशने	भ्वादि, प.प.
७५	दिश अतिसर्जने	तुदा, प.प.
७६	दृश् दृशिर् प्रेक्षणे	भ्वादि, प.प.
७७	मृश आमर्शने	तुदा, प.प.
७८	रिश हिंसायाम्	तुदा, प.प.
७९	रुश हिंसायाम्	तुदा, प.प.
८०	लिशँ अल्पीभावे, लिश गतौ	दिवा, आ.प. तुदा, प.प.
८१	विश प्रवेशने	तुदा, प.प.
८२	स्पृश संस्पर्शे	तुदा, प.प.
८३	कृष विलेखने	भ्वादि, तुदा, उ.प.
८४	त्विषँ दीप्तौ	भ्वादि, उ.प.
८५	तुष प्रीतौ	दिवा, प.प.
८६	द्विषँ अप्रीतौ	अदा, उ.प.
८७	दुष वैकृत्ये	दिवा, प.प.
८८	पुष्य – पुष् पुष पुष्टौ	दिवा, प.प.
८९	पिष् पिषॢँ सञ्चूर्णने	रुधा, प.प.
९०	विष् विषॢँ व्याप्तौ, विषुँ सेचने, विष विप्रयोगे	जुहो, उ.प. भ्वादि, प.प. क्र्यादि, प.प.
९१	शिष् शिष हिंसायाम्, शिषॢँ विशेषणे, शिष असर्वोपयोगे	भ्वादि, प.प. रुधा, प.प. चुरा, उ.प.
९२	शुष शोषणे	दिवा, प.प.
९३	श्लिष्य श्लिष् श्लिष आलिङ्गने	दिवा, प.प.
९४	घस् घसॢँ अदने	भ्वादि, प.प.

अनुक्र.	धातुः - अर्थः	गणः, पदम्
९५	वसति वस निवासे	भ्वादि, प.प.
९६	दह भस्मीकरणे	भ्वादि, प.प.
९७	दिहँ उपचये	अदा, उ.प.
९८	दुहँ प्रपूरणे	अदा, उ.प.
९९	नह् णहँ बन्धने	दिवा, उ.प.
१००	मिह सेचने	भ्वादि, प.प.
१०१	रुह बीजजन्मनि प्रादुर्भावे च	भ्वादि, प.प.
१०२	लिहँ आस्वादने	अदा, उ.प.
१०३	वहँ प्रापणे	भ्वादि, उ.प.

उदाहरणे सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण क्षि थ इति स्थिते आर्धधातुकस्येड् वलादेः इति सूत्रेण थलः इडागमः प्राप्तः। क्षिधातुः उपदेशे एकाच् अनुदात्तश्च। (एकाच् अजन्तः प्रथमकारिकायां नास्ति चेद् अनुदात्तः इति सुबोधः नियमः स्मर्तव्यः।) अतः प्राप्तस्य इडागमस्य एकाच उपदेशेऽनुदात्तात् इति सूत्रेण निषेधः प्राप्तः। तदा -

[१७.८] कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि॥ (७.२.१३)

सूत्रार्थः - क्रादिभ्य एव लिट इण्न स्याद् अन्यस्माद् अनिटोऽपि स्यात्।

सूत्रव्याख्या - नियमसूत्रमिदम्। अस्मिन् सूत्रे द्वे पदे स्तः। कृसृभृवृस्तुद्रुस्रुश्रुवः लिटि इति सूत्रगतपदच्छेदः। कृसृभृवृस्तुद्रुस्रुश्रुवः (५/१), लिटि (७/१)। नेड्वशि कृति इति सूत्रात् न इति अव्ययमनुवर्तते। आर्धधातुकलिटः इडागमः अत्र भवति। अतः लिटि इत्यस्य लिटः इति षष्ठ्यन्ततया विपरिणामो भवति। सूत्रार्थो भवति - कृ सृ भृ वृ स्तु द्रु स्रु श्रु एभ्यः लिटः इट् न भवति।

अस्मिन् सूत्रे अनुबन्धरहितः कृ डुकृञ् करणे, कृञ् हिंसायाम् इति द्वयोः ग्राहकः।

सृ इत्यनेन सृ गतौ इति धातुः गृह्यते। भृ इति निरनुबन्धकपाठात् भृञ् भरणे डुभृञ् धारणपोषणयोः इति द्वयोः ग्रहणम्। वृ इति निरनुबन्धकपाठेन वृङ सम्भक्तौ वृञ् वारणे इति द्वौ गृह्येते। स्तु इत्यनेन ष्टुञ् स्तुतौ इति धातुः गृह्यते। द्रु स्रु गतौ इति गृह्येते। श्रु श्रवणे गृह्यते।

कथं नियमसूत्रत्वम् - अत्र कृ सृ भृ इति त्रयः एकाचः अनुदात्ताः च। अतः त्रिभ्यः एकाच उपदेशेनुदात्तात् इत्यनेन इडागमो न भवति। वृ धातोश्च (श् र् युकः) श्र्युकः क्किति (श्रिञः एकाच उगन्ताच्च गित्कितोः प्रत्यययोः इट् न) उगन्तत्वात् थलश्च कित्त्वात् इट् न प्राप्नोति। एवमेतेभ्यः चतुर्भ्यः तु क्रादिसूत्रं विनापि इट् नैव भवति। चतुर्भ्यः इडागमस्य निषेधः सिद्धः अस्ति। सिद्धे सति पुनः निषेधाय

सूत्रम् आरब्धम्। अतः तत् नियमाय कल्पते। एवम् तेषामत्र उपादानम् नियमार्थं सिद्ध्यति। सिद्धे सति आरम्भो नियमार्थः। स्तु द्रु स्रु श्रु आदिभ्यः थलः भारद्वाजनियमेन पाक्षिक इट् प्राप्नोति। परन्तु तेभ्यः इट् नैव भवतु इति अत्र सूत्रे उपादानम् कृतम्। एवञ्च पर्यालोचनया सूत्रार्थो भवति - कृ सृ भृ वृ स्तु द्रु स्रु श्रु एभ्यः एव लिटः इट् न भवति, अन्येभ्यः लिटः इट् भवति। अतः अन्येभ्यः एकाच उपदेशेऽनुदात्तात् इत्यनेन इडागमनिषेधः प्राप्तः आसीत्। परन्तु अनेन सूत्रेण तेभ्यः इडागमः पुनः भवति। अनेन सूत्रेण कृतः नियमः क्रादिनियमः इति कथ्यते।

आर्धधातुकस्येड्वलादेः इति सूत्रेण अविशेषेण समेषाम् वलादीनाम् आर्धधातुकानाम् इट् विधीयते। एकाच उपदेशे अनुदात्तात् इति सूत्रेण उपदेशे एकाच्कात् अनुदात्तात् परस्य इट् निषिध्यते अविशिषेण। अत्र येभ्यः निषेधः जातः तेषु क्रादीन् विहाय अन्येभ्यः पुनः इडागमः क्रादिनियमेन भवति। तथा च कृ-सृ-भृ-वृ-स्तु-द्रु-स्रु-श्रुवो लिटि इति अनेन क्रादिभ्यः अष्टभ्य एव लिटि इट् निषिध्यते। अन्येभ्यः अनिड्भ्यः अपि इट् विधीयते। अनिटाम् इदं पुनः सेट्त्वं केवलं लिटि एव।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण क्षि थ इति स्थिते आर्धधातुकस्येड् वलादेः इति सूत्रेण थलः इडागमः प्राप्तः। प्राप्तस्य इडागमस्य एकाच उपदेशेऽनुदात्तात् इति सूत्रेण निषेधः प्राप्तः एवञ्च क्षिधातुः क्रादिषु नास्ति। अतः क्रादिनियमेन क्षिधातोः लिटः थलः पुनः इडागमः प्राप्तः। तदा -

[१७.९] अचस्तास्वत् थल्यनिटो नित्यम्॥ (७.२.६१)

सूत्रार्थः - उपदेशेऽजन्तो यो धातुः तासौ नित्यानिट् ततः थल इट् न।

सूत्रव्याख्या - निषेधसूत्रमिदम्। अनेन सूत्रेण इट् निषिध्यते। अस्मिन् सूत्रे पञ्च पदानि सन्ति। अचः तास्वत् थलि अनिटः नित्यम् इति सूत्रगतपदच्छेदः। अचः (५/१), तास्वत् इत्यव्ययम्। थलि (७/१), अनिटः (५/१), नित्यम् इति क्रियाविशेषणम् अव्ययम्। उपदेशेऽत्वतः इति सूत्रात् उपदेशे (७/१) इति पदमनुवर्तते। तासि च क्लृपः इति सूत्रात् तासि (७/१) इति पदमनुवर्तते। गमेरिट् परस्मैपदेषु इति सूत्रात् इट् (१/१) इति पदमनुवर्तते। न वृद्भ्यश्चतुर्भ्यः इति सूत्रात् न इत्यव्ययम् अनुवर्तते। धातोः एव थल् विधीयते। अतः धातोः (५/१) इत्यस्य आक्षेपः क्रियते। तासौ इव तास्वत् इति सप्तम्यन्तात् वतिप्रत्ययः। पदयोजना - उपदेशे अचः धातोः तासि नित्यम् अनिटः तास्वत् थलि इट् न। अचः धातोः इत्यत्र अचः इति धातोः इत्यस्य विशेषणम्। अतः तदन्तविधिना अजन्ताद् धातोः इति लभ्यते। सूत्रार्थो भवति - उपदेशे यो धातुः अजन्तः, स तासौ नित्यम् अनिट् चेत् यथा तासि इडागमः न भवति तथा तस्मात् धातोः थलः इट् न कर्तव्यः। अर्थात् यः धातुः उपदेशे अजन्तः, तस्मात् धातोः तासः यदि नित्यम् इट् न तर्हि थलः अपि इट् न भवति।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण क्रादिनियमेन क्षिधातोः लिटः थलः पुनः इडागमः प्राप्तः। क्षिधातुः उपदेशे अजन्तः। एवञ्च एकाच उपदेशेऽनुदात्तात् इति सूत्रेण तस्मात् परस्य तासः नित्यम् इडागमः न भवति। अतः स तासि नित्यम् अनिट्। अतः अचस्तास्वत् थल्यनिटो नित्यम् इति सूत्रेण क्षिधातोः थलः इडागमस्य निषेधः प्राप्तः। (यद्यपि अग्रिमसूत्रम् क्षिधातौ नावश्यकम्। तथापि प्रकरणवशाद् अत्रैव उपन्यस्तम्।) तदा - (भारद्वाजनियमः द्रष्टव्यः।)

[१७.१०] उपदेशेऽत्वतः॥ (७.२.६२)

सूत्रार्थः - उपदेशे अकारवतः तासौ नित्यानिटः परस्य थल इट् न स्यात्।

सूत्रव्याख्या - निषेधसूत्रमिदम्। अनेन सूत्रेण इट् निषिध्यते। अस्मिन् सूत्रे द्वे पदे स्तः। उपदेशे अत्वतः इति सूत्रगतपदच्छेदः। उपदेशे (७/१), अत्वतः (५/१)। अचस्तास्वत् थल्यनिटो नित्यम् इति सूत्राद् तास्वत् इत्यव्ययम्, थलि (७/१), अनिटः (५/१), नित्यम् इति क्रियाविशेषणम् अव्ययम्। तासि च क्लृपः इति सूत्रात् तासि (७/१) इति पदमनुवर्तते। गमेरिट् परस्मैपदेषु इति सूत्रात् इट् (१/१) इति पदमनुवर्तते। न वृद्भ्यश्चतुर्भ्यः इति सूत्रात् न इत्यव्ययम् अनुवर्तते। धातोः एव थल् विधीयते। अतः धातोः (५/१) इत्यस्य आक्षेपः क्रियते। अत् अस्ति अस्मिन्निति अत्वान्, तस्य अत्वतः। ह्रस्वाकारवान् धातुः इति यावत्। तासौ इव तास्वत् इति सप्तम्यन्तात् वतिप्रत्ययः। पदयोजना - उपदेशे अत्वतः धातोः तासि नित्यम् अनिटः तास्वत् थलि इट् न। सूत्रार्थो भवति - उपदेशे यो धातुः अत्वान् , स तासौ नित्यम् अनिट् चेत् यथा तासि इडागमः न भवति तथा तस्मात् धातोः थलः इट् न कर्तव्यः। अर्थात् यः धातुः उपदेशे अत्वान्, तस्मात् धातोः तासः यदि नित्यम् इट् न तर्हि थलः अपि इट् न भवति।

उदाहरणम् - पच् शक् इत्यादिः अत्वान् धातुः। तेषाम् पपक्थ शशक्थ इत्यादीनि रूपाणि भवन्ति।

[१७.११] ऋतो भारद्वाजस्य॥ (७.२.६३)

सूत्रार्थः - तासौ नित्यानिटः ऋदन्तादेव थलो नेट् भारद्वाजस्य मते। तेन अन्यस्य स्यादेव।

सूत्रव्याख्या - नियमसूत्रमिदम्। अस्मिन् सूत्रे द्वे पदे स्तः। ऋतः भारद्वाजस्य इति सूत्रगतपदच्छेदः। ऋतः (५/१), भारद्वाजस्य (६/१)। अचस्तास्वत् थल्यनिटो नित्यम् इति सूत्राद् तास्वत् इत्यव्ययम्, थलि (७/१), अनिटः (५/१), नित्यम् इति क्रियाविशेषणम् अव्ययम्। तासि च क्लृपः इति सूत्रात् तासि (७/१) इति पदमनुवर्तते। गमेरिट् परस्मैपदेषु इति सूत्रात् इट् (१/१) इति पदमनुवर्तते। न वृद्भ्यश्चतुर्भ्यः इति सूत्रात् न इत्यव्ययम् अनुवर्तते। धातोः एव थल् विधीयते। अतः धातोः (५/१) इत्यस्य आक्षेपः क्रियते। तासौ इव तास्वत् इति सप्तम्यन्तात् वतिप्रत्ययः। पदयोजना - उपदेशे ऋतः धातोः तासि नित्यम् अनिटः तास्वत् थलि इट् न। ऋतः धातोः इत्यत्र ऋतः इति धातोः इत्यस्य विशेषणम्। अतः तदन्तविधिना ऋदन्ताद् धातोः इति लभ्यते। सूत्रार्थो भवति - उपदेशे यो धातुः ऋदन्तः, स तासौ नित्यम् अनिट् चेत् यथा तासि इडागमः न भवति तथा तस्मात् धातोः थलः इट् न कर्तव्यः। अर्थात् यः धातुः उपदेशे ऋदन्तः, तस्मात् धातोः तासः यदि नित्यम् इट् न तर्हि थलः अपि इट् न भवति।

तत्रायं समुदितः अर्थः -

अचस्तास्वत् थल्यनिटो नित्यम् इति सूत्रेण तासि नित्यानिटः अजन्तात् धातोः परस्य थलः इट् निषिध्यते। तेन तु ऋदन्तात् धातोः अपि इट् निषिध्यते एव। एवम् इटः निषेधः सिद्ध एव। सिद्धे

सत्यपि सूत्रारम्भः कृतः। सिद्धे सति आरम्भः नियमाय कल्पते इति नियमः। अतः इदं नियमसूत्रम् इति आयाति। तेन नियमः भवति यद् भारद्वाजस्य मतेन यदि तासौ नित्यानिटः धातोः इडागमस्य निषेधः तर्हि स ऋदन्ताद् एव धातोः भवति, अन्येभ्यः इडागमस्य निषेधः न भवति। अर्थात् तेभ्यः इडागमः भवति। भारद्वाजभिन्नाः पाणिन्यादिमुनिमतेन अचस्तास्वत् थल्यनिटो नित्यम् इति, उपदेशेऽत्वतः इति द्वाभ्याम् सूत्राभ्याम् इट् निषिध्यते। ऋदन्तात् निषिध्यते एव। परन्तु भारद्वाजस्य मतं यद् ऋदन्ताद् एव अयं इटः निषेधः भवतु, अन्यत्र इडागमः भवतु। तर्हि अचस्तास्वत् थल्यनिटो नित्यम् इति, उपदेशेऽत्वतः इति अत्र इडागमविषये मतद्वयम् अस्ति, एकेन मतेन निषेधः, अपरेण मतेन प्राप्तिः। इत्थं विकल्पः फलति। यतो मतद्वयमपि प्रमाणम्। तेन ऋदन्तात् इडागमनिषेधः सर्वमतेन। अचस्तास्वत् थल्यनिटो नित्यम् इति, उपदेशेऽत्वतः इति उभयत्र विकल्पः। अचस्तास्वत् थल्यनिटो नित्यम् इति, उपदेशेऽत्वतः इति ऋतो भारद्वाजस्य इति त्रीणि अपि सूत्राणि थलः इडागमविषयकाणि एव।

इडागमविषये उक्तार्थं संगृह्णाति इयं कारिका -

अजन्तोऽकारवान् वा यस्तास्यनिट् थलि वेडयम्।
ऋदन्त ईदृङ् नित्यानिट् क्राद्यन्यो लिटि सेड् भवेत्।

उदाहरणे सूत्रार्थसमन्वयः - अचस्तास्वत् थल्यनिटो नित्यम् इति पूर्वसूत्रोक्तप्रकारेण क्षिधातुः उपदेशे अजन्तः। एवञ्च एकाच उपदेशेऽनुदात्तात् इति सूत्रेण तस्मात् परस्य तासः नित्यम् इडागमः न भवति। अतः स तासि नित्यम् अनिट्। अतः अचस्तास्वत् थल्यनिटो नित्यम् इति सूत्रेण क्षिधातोः थलः इडागमस्य निषेधः प्राप्तः। तदा भारद्वाजनियमेन क्षिधातोः थलः विकल्पेन इडागमः भवति। तेन इडागमपक्षे - क्षि इथ इति स्थिते द्वित्वे अभ्यासकार्ये चिक्षि इथ इति स्थिते गुणे अयादेशे **चिक्षयिथ** इति रूपं सिध्यति। इडभावपक्षे तु क्षि थ इति स्थिते द्वित्वे अभ्यासकार्ये चिक्षि थ इति स्थिते गुणे **चिक्षेथ** इति रूपं सिध्यति।

चिक्षियथुः - क्षिधातोः लिटि मध्यमपुरुषद्विवचने थस्-प्रत्यये तस्य अथुसादेशे क्षि अथुस् इति स्थिते द्वित्वे अभ्यासकार्ये चिक्षि अथुस् इति जायते। ततश्च इकारस्य इयङ् इत्यादेशे रुत्वे विसर्गे **चिक्षियथुः** इति रूपं सिध्यति।

चिक्षिय - क्षिधातोः लिटि मध्यमपुरुषबहुवचने थ-प्रत्यये तस्य अ-आदेशे क्षि अ इति स्थिते द्वित्वे अभ्यासकार्ये चिक्षि अ इति जायते। ततश्च इकारस्य इयङ् इत्यादेशे **चिक्षिय** इति रूपं सिध्यति।

चिक्षाय, चिक्षय - क्षिधातोः लिटि उत्तमपुरुषैकवचने मिप्-प्रत्यये तस्य णलादेशे अनुबन्धलोपे क्षि अ इति स्थिते द्वित्वे अभ्यासकार्ये चिक्षि अ इति जायते। णलः णित्त्वात् अचो ञ्णिति इति सूत्रेण अजन्ताङ्गस्य वृद्धिः प्राप्ता। तदा -

[१७.१२] णलुत्तमो वा॥ (७.१.९१)

सूत्रार्थः - उत्तमो णल् वा णित् स्यात्।

सूत्रव्याख्या - अतिदेशसूत्रमिदम्। अनेन सूत्रेण णित्त्वं विधीयते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। णल् उत्तमः वा इति सूत्रगतपदच्छेदः। णल् (१/१), उत्तमः (१/१), वा इत्यव्ययपदम्। गोतो णित् इति सूत्राद् णित् (१/१) इति पदमनुवर्तते। सूत्रार्थो भवति - उत्तमः णल् विकल्पेन णित् भवति। अर्थात् उत्तमसंज्ञकस्य णलः विकल्पेन णित्त्वं भवति। णित् विकल्पेन भवति इत्यस्य तात्पर्यं यद् पक्षे णकारस्य इत्संज्ञा भवति, अपरपक्षे तु णकारः नास्ति एव इति। तेन न णित्त्वम् इति।

उदाहरणम् - चिक्षाय, चिक्षय।

सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण क्षिधातोः णलि चिक्षि अ इति जाते अचो ञ्णिति इति सूत्रेण अजन्ताङ्गस्य वृद्धिः प्राप्ता। परन्तु यस्मिन् पक्षे णल् णित् गण्यते तदा वृद्धिः भवति, इकारस्य स्थाने च स्थानत आन्तर्याद् ऐकारो भवति। तदा चिक्षै अ इति जाते एचोऽयवायावः इति सूत्रेण आयादेशे **चिक्षाय** इति रूपं सिध्यति। यस्मिन् पक्षे णल् णित् नास्ति तदा तु सार्वधातुकार्धधातुकयोः इत्यनेन इगन्ताङ्गस्य गुणे इकारस्य एकारे चिक्षे अ इति जाते एचोऽयवायावः इति सूत्रेण अयादेशे **चिक्षय** इति च रूपं सिध्यति।

चिक्षियिव - क्षिधातोः लिटि उत्तमपुरुषद्विवचने वस्-प्रत्यये तस्य व-आदेशे क्षि व इति स्थिते वसादेशस्य व इत्यस्य आर्धधातुकत्वात् वलादित्त्वाच्च आर्धधातुकस्येड् वलादेः इति सूत्रेण इडागमे प्राप्ते एकाच उपदेशेऽनुदात्तात् इति सूत्रेण तस्य निषेधः भवति। तदा कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि इति क्रादिनियमेन पुनः इडागमो भवति। तेन क्षि इव इति जाते द्वित्वे अभ्यासकार्ये चिक्षि इव इति जायते। सार्वधातुकार्धधातुकयोः इत्यनेन इकः इकारस्य स्थाने गुणे प्राप्ते असंयोगाल्लिट् कित् इत्यनेन लिटः अपिल्लिटः कित्वातिदेशात् क्ङिति च इत्यनेन इग्लक्षणगुणस्य निषेधे इकारस्य इयङ् इत्यादेशे **चिक्षियिव** इति रूपं सिध्यति।

चिक्षियिम - क्षिधातोः लिटि उत्तमपुरुषबहुवचने पूर्वोक्तप्रकारणे **चिक्षियिम** इति रूपं सिध्यति।

क्षि+लिट्	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	चिक्षाय	चिक्षियतुः	चिक्षियुः
मध्यमपुरुषः	चिक्षयिथ चिक्षेथ	चिक्षियथुः	चिक्षिय
उत्तमपुरुषः	चिक्षाय चिक्षय	चिक्षियिव	चिक्षियिम

पाठगतप्रश्नाः-२

उपरितनपाठम् अवलम्ब्य अत्र केचित् लघूत्तरीयाः प्रश्नाः दीयन्ते। एतेषाम् उत्तराणि लिखित्वा अन्ते दत्तैः उत्तरैः मेलयत।

१०. एकाच उपदेशेऽनुदात्तात् इति सूत्रस्यार्थं लिखत।

११. किंलक्षणाद् धातोः परस्यार्धधातुकस्य इट् न भवति।

१२. ऊद्दृदन्तैर्यौति ... इति कारिकास्थाः धातवः अनुदात्ताः न वा।

१३. कति हलन्ताः धातवः अनुदात्ताः।

१४. क्रादिनियमः कः।

१५. उपदेशेऽत्वतः इति सूत्रस्यार्थं लिखत।

१६. भारद्वाजमते कस्य इड् नैव भवति।

१७. णलुत्तमो वा इति सूत्रेण किं क्रियते।

१८. क्षिधातोः लिटि मिपि कति रूपाणि कानि च तानि।

१९. चिक्षिय इति रूपे धातोः परं कः तिङ् प्रत्ययः।

१) तिप् २) सिप् ३) थस् ४) थ

२०. चिक्षाय चिक्षय इति रूपयोः कः लकारः, कश्च तिङ् प्रत्ययः।

१) लिट् सिप् २) लुट् मिप् ३) लिट् मिप् ४) लुङ् थ

पाठसारः

अस्मिन् पाठे लिट्-लकारस्य कानिचन मुख्यानि सूत्राणि आलोचितानि। लिट्-लकारे गणीयविकरणं किमपि नास्ति। स्वकीयमपि किमपि विकरणं नास्ति। धातोः द्वित्वम् इत्येव लिटः प्रधानं वैशिष्ट्यम्। एत्वम् अभ्यासलोपः इति अपरं वैशिष्ट्यम्। इडागमव्यवस्था इति अन्यतमम् ईषत् क्लिष्टं प्रकरणम्।

पूर्वपाठेषु भूधातोः लिटि रूपाणि अतिक्रान्तानि। तानि साधयितुम् यावन्ति सूत्राणि अभीष्टानि आसन् तानि तत्रैव उपन्यस्तानि। अत्र अस्मिन् पाठे मुख्यत्वेन इडागमव्यवस्था उक्ता।

अभ्यासस्य आदिः यदि अत् स्यात् तर्हि तस्य दीर्घः अत आदेः इति सूत्रेण भवति। अचो ञ्णिति इति सूत्रेण यथा अजन्ताङ्गस्य वृद्धिः विधीयते तथा उपधायाः अतः वृद्धिः ञिति णिति च अत उपधायाः इति सूत्रेण विधीयते। अचो ञ्णिति इति अत उपाधायाः इति सूत्रद्वयम् एकदलीयम्।

इकः इति षष्ठ्यन्तम् पदम् आनीय यत्र गुणः वृद्धिर्वा विधीयते स गुणः इग्लक्षणगुणः कथ्यते, वृद्धिश्च इग्लक्षणवृद्धिः कथ्यते। क्क्ङिति च इति सूत्रं किति गिति ङिति च प्रत्यये परे इग्लक्षणगुणस्य इग्लक्षणवृद्धेश्च निषेधं करोति। अतः पाणिनिमुनिः क्वचित् प्रत्ययस्य स्वकीयं कित्त्वं गित्त्वं ङित्त्वं च करोति, क्वचित् अतिदिशति। स्वकीयं कित्त्वं यथा क्तप्रत्ययः, क्तवतुप्रत्ययः यक् प्रत्ययः इत्यादिषु।

असंयोगात् परः यः अपित् लिट् तस्य कित्त्वं विधीयते असंयोगाल्लिट् कित् इति सूत्रेण। क्वचित्तु कित्त्वस्य ङित्त्वस्य लाभाय यत् अपित्त्वं तदेव अतिदिशति यथा - सेर्ह्यपिच्च इत्यत्र, आङुत्तमस्य पिच्च इति। लिटि कित्वातिदेशस्य इदं सूत्रं यथा तथा सार्वधातुकमपित् इति सूत्रम् अपितः सार्वधातुकस्य ङिद्वत्त्वं विदधाति। अत एव तत्र तत्र स्थलेषु पाणिनिः प्रत्ययं पितम् अपितं वा करोति।

धातोः परं तिङ् कृत् इति द्विविधः एव प्रत्ययः विधीयते। उभयत्र इडागमः सति प्रसङ्गे भवति। तत्र वलादेः आर्धधातुकस्य इट् आर्धधातुकस्येड् वलादेः इति सूत्रेण अविशेषेण तिङि कृति च विधीयते। तत्र यस्य धातोः एकाच्त्वे सति अनुदात्तत्वम् अस्ति तस्मात् धातोः परस्य वलादेः आर्धधातुकस्य इडागमो न भवति। तत्र निषेधकं सूत्रं हि एकाच उपदेशेऽनुदात्तात्। अनेन धातोः परस्य विहितस्य तिङ्-प्रत्ययस्य कृत्-प्रत्ययस्य च इट् निषिध्यते। यस्मात् धातोः परस्य इट् न भवति स धातुः अनिट् कथ्यते। यस्मात् धातोः परस्य इट् भवति स धातुः सेट् कथ्यते। यस्माद् धातोः परस्य इट् विकल्पेन भवति स धातुः वेट् कथ्यते।

एवम् एकाच उपदेशेऽनुदात्तात् इति सूत्रेण निषेधः कृतः। लिटि लकारे क्रादिभ्यः एव अष्टभ्यः धातुभ्यः एव अयं निषेधः प्रवर्तते। अन्येभ्यः धातुभ्यः इडागमः भवति। अर्थात् लिल्लकारं विहाय अन्यत्र तेभ्यो धातुभ्यः इडागमः न भवति किन्तु लिटि तु भवति।

तत्र थलि विशेषो वर्तते। येभ्यः धातुभ्यः तास्-प्रत्ययस्य नित्यम् इट् न भवति तेषु ऋदन्तादेव धातोः थलः इट् न भवति, अन्यः यः अजन्तः अकारवान् वा धातुः स्यात् तस्मात् विकल्पेन इट् भवति। अर्थात् अजन्तः अकारवान् वा धातुः यदि तासि नित्यम् अनिट् तर्हि थलि वेट् भवति। ऋदन्तधातुस्तु यदि तासि नित्यम् अनिट् तर्हि थलि अपि अनिट् एव भवति। लिटि थलम् विहाय अन्यत्र क्रादिभिन्नाः सेटः भवन्ति। एवमयमिडाशयः।

पाठान्तप्रश्नाः

१. अचो ञ्णिति इति सूत्रं व्याख्यात।

२. कुहोश्चुः इति सूत्रं व्याख्यात।

३. ससूत्रं रूपाणि साधयत – आत, आतुः, चिक्षाय, चिक्षियतुः, चिक्षयिथ, चिक्षेथः।

४. एकाच उपदेशेऽनुदात्तात् इति सूत्रं व्याख्यात।

५. भारद्वाजनियमं विवृणुत।

६. णलुत्तमो वा इति सूत्रं व्याख्यात।

७. ससूत्रं रूपाणि साधयत – चिक्षेथ, चिक्षयिथ, चिक्षाय, चिक्षय, चिक्षिय।

पाठगतप्रश्नानाम् उत्तरमाला

उत्तराणि- १

१. अभ्यासस्यादेरतो दीर्घः अत आदेः इति सूत्रेण।

२. अतति इत्यत्रत्यस्य अत्-धातोरर्थः सातत्यगमनम्।

३. अत उपधायाः।

४. द्वित्वनिमित्तेऽचि अच आदेशो न द्वित्वे कर्तव्ये।

५. कुहोश्चुः।

६. अचो ञ्णिति।

७. चिक्षियतुः इति रूपे आर्धधातुकनिबन्धनगुणस्य अभावस्य कारणं हि असंयोगाल्लिट् कित् इति सूत्रेण अतुसः कित्त्वं विधीयते।

८. चिक्षियतुः इति रूपे अचि श्नुधातुभ्रुवां य्वोरियङुवङौ इति सूत्रेण इकारस्य स्थाने इयङ् इत्यादेशे कृते यकारः आगतः।

९. २

उत्तराणि- २

१०. उपदेशे यो धातुः एकाच् अनुदात्तश्च तत आर्धधातुकस्य इट् न भवति।

११. उपदेशे यो धातुः एकाच् अनुदात्तश्च तत आर्धधातुकस्य इट् न भवति।

१२. न।

१३. १०३

१४. क्रादिभ्य एव लिट इण्न भवति अन्यस्माद् अनिटोऽपि इडागमः भवतीति क्रादिनियमः।।

१५. उपदेशे अकारवतः तासौ नित्यानिटः परस्य थल इट् न स्यात्।

१६. तासौ नित्यानिटः ऋदन्तादेव थल इट् नैव भवति भारद्वाजस्य मते।

१७. णलुत्तमो वा इति सूत्रेण उत्तमस्य णलः णित्त्वम् अतिदिश्यते।

१८. क्षिधातोः लिटि मिपि चिक्षाय चिक्षय इति द्वे रूपे।

१९. ४

२०. ३

॥ इत् सप्तदशः पाठः ॥

ΩΩΩ